## हायनान्तयुवादिभ्योऽण्। (१३०/१७९८)

हायनान्तेभ्यः प्रातिपदिकेभ्यः युवादिभ्यश्च अण् प्रत्ययो भवति भावकर्मणोरर्थयोः। द्विहायनस्य भावः कर्म वा द्वैहायनम्। त्रैहायनम्। [1]युवादिभ्यः – यौवनम्। स्थाविरम्।

[५४१] श्रोत्रियस्य [2]यलोपश्च वाच्यः। (म.भा. २.३७१)

श्रोत्रियस्य भावः कर्म वा श्रौत्रम्।

युवन्। स्थविर। होतृ। यजमान। कमण्डलु। '[3]पुरुषासे' (ग. सू. ११८)। सुहृत्। यातृ। श्रवण। कुस्त्री। सुस्त्री। सुहृदय। सुभ्रातृ। वृषल। दुर्भ्रातृ। 'हृदयासे' (ग.सू. ११९)। क्षेत्रज्ञ। कृतक। परिव्राजक। कुशल। चपल। निपुण। पिशुन। सब्रह्मचारिन्। कुतूहल। अनृशंस। युवादिः॥

## इगन्ताच्च लघुपूर्वात्। (१३१/१७९९)

इगन्ताच्च [4]लघुपूर्वात् अण् प्रत्ययो भवति भावकर्मणोः[5]। लघुपूर्वग्रहणेन प्रातिपदिकसमुदायो विशेष्यते। लघुः पूर्वोऽवयवो[6]ऽस्य इति [7]लघुपूर्वः। कुतः पुनरसौ [8]लघुः पूर्वः। इक्सन्निधानादिकः इति विज्ञायते। [9]लघुः पूर्वो यस्मादिकः तदन्तान् प्रातिपदिकाद् इत्ययमर्थो विवक्षितः। अपरे [10]तत्पुरुषकर्मधारयं वर्णयन्ति। इक् चासावन्तश्च इति इगन्तः। लघुपूर्वग्रहणेन स एव[11] विशेष्यते, पश्चात् तेन प्रातिपदिकस्य तदन्तविधिः इति। अस्मिन् व्याख्यानेऽन्तग्रहणमतिरिच्यते। [12]लघुपूर्वादिकः इत्येतावदेव वाच्यं स्यात्। शुचेर्भावः कर्म वा शौचम्। मौनम्। [13]नागरम्। हारीतकम्। पाटवम्। लाघवम्। इगन्तात् इति किम्? [14]पटत्वम्। घटत्वम्। लघुपूर्वात् इति किम्? कण्डूत्वम्। पाण्डुत्वम्। कथं काव्यम् इति? ब्राह्मणादिषु कविशब्दो द्रष्टव्यः॥

## योपधाद्गुरूपोत्तमाद् वुञ्। (१३२/१८००)

त्रिप्रभृतीनाम[15]न्त्यस्य समीपमुपोत्तमम्। [16]गुरुः उपोत्तमं यस्य तद् गुरूपोत्तमम्। यकारोपधात्[17] गुरूपोत्तमाद् वुञ् प्रत्ययो भवति भावकर्मणोः। रमणीयस्य भावः कर्म वा रामणीयकम्। [18]वासनीयकम्। योपधात् इति किम्? [19]विमानत्वम्। गुरूपोत्तमात् इति किम्? क्षत्रियत्वम्।

[५४२] सहायाद्वेति वक्तव्यम्।

साहायकम्, साहाय्यम्॥

---

1. खल्वपि इत्यधिकम् क. ह. 2. अण् च इत्यधिकम् क. 3. पुरुषादसमासे क, कुटुम्बक स्वसृ कुटुम्ब दुर्हृदय सुकृत दुष्कृत इत्यधिकम् क, पुरुष होतृ कृत्रिम रुत असुरु दुःस्त्री इत्यधिकम् ड. 4. प्रातिपदिकात् इत्यधिकम् ब. क. ह. 5. अर्थयोः इत्यधिकम् ग. फ. ह, अभिधेययोः इत्यधिकम् क. 6. यस्य क. ग. 7. लघुपूर्वः नास्ति फ. 8. लघुपूर्वैः क. ड, पूर्वः ह. 9. लघुपूर्वः ब. ग. ह. 10 तत्पुरुषं कर्मधारयं च ब. ड, कर्मधारयं क. 11. इग् इत्यधिकम् ड. 12. इह इत्यधिकम् फ. 13. नागरजनम् ब, नारवर्जनम् ड, नारवरं जनं क, महाराजनथ् ह. 14. पदत्वं मघत्वम् ह. 15. अन्त्यात् पूर्वम् ब. ड. 16. गुरु ब. 17. प्रातिपदिकात् इत्यधिकम् ब. क. फ. 18. कामनीयकम् क. 19. विज्ञानत्वम् क, कुलीनत्बम् ब.